# RiNamochakamangalastotram

# ઋણમોચકમઙ્ગલસ્તોત્રમ્

## Document Information

Text title : RiNamochakama.ngalastotra

File name : mangalastotra.itx

Category : navagraha, stotra

Location : doc_z_misc_navagraha

Author : traditional

Transliterated by : Aneesh Chinubhai aconline at indiatimes.com

Proofread by : Aneesh Chinubhai, Kirk Wortman kirkwort at hotmail.com

Latest update : November 11, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 23, 2022

*sanskritdocuments.org*

# ઋણમોચકમઙ્ગલસ્તોત્રમ્

શ્રીગણેશાય નમઃ ॥

મઙ્ગલો ભૂમિપુત્રશ્ચ ઋણહર્તા ધનપ્રદઃ ।
સ્થિરાસનો મહાકાયઃ સર્વકર્માવિરોધકઃ ॥ ૧॥

લોહિતો લોહિતાક્ષશ્ચ સામગાનાં કૃપાકરઃ ।
ધરાત્મજઃ કુજો ભૌમો ભૂતિદો ભૂમિનન્દનઃ ॥ ૨॥

અઙ્ગારકો યમશ્ચૈવ સર્વરોગાપહારકઃ ।
વૃષ્ટેઃ કર્તાઽપહર્તા ચ સર્વકામફલપ્રદઃ ॥ ૩॥

એતાનિ કુજનામાનિ નિત્યં યઃ શ્રદ્ધયા પઠેત્ ।
ઋણં ન જાયતે તસ્ય ધનં શીઘ્રમવાપ્નુયાત્ ॥ ૪॥

ધરણીગર્ભસમ્ભૂતં વિદ્યુત્કાન્તિસમપ્રભમ્ ।
કુમારં શક્તિહસ્તં ચ મઙ્ગલં પ્રણમામ્યહમ્ ॥ ૫॥

સ્તોત્રમઙ્ગારકસ્યૈતત્પઠનીયં સદા નૃભિઃ ।
ન તેષાં ભૌમજા પીડા સ્વલ્પાપિ ભવતિ ક્વચિત્ ॥ ૬॥

અઙ્ગારક મહાભાગ ભગવન્ભક્તવત્સલ ।
ત્વાં નમામિ મમાશેષમૃણમાશુ વિનાશય ॥ ૭॥

ઋણરોગાદિદારિદ્ર્યં યે ચાન્યે હ્યપમૃત્યવઃ ।
ભયક્લેશમનસ્તાપા નશ્યન્તુ મમ સર્વદા ॥ ૮॥

અતિવક્ર દુરારાધ્ય ભોગમુક્ત જિતાત્મનઃ ।
તુષ્ટો દદાસિ સામ્રાજ્યં રુષ્ટો હરસિ તત્ક્ષણાત્ ॥ ૯॥

વિરિઞ્ચિશક્રવિષ્ણૂનાં મનુષ્યાણાં તુ કા કથા ।
તેન ત્વં સર્વસત્ત્વેન ગ્રહરાજો મહાબલઃ ॥ ૧૦॥

પુત્રાન્દેહિ ધનં દેહિ ત્વામસ્મિ શરણં ગતઃ ।

ઋણદારિદ્ર્યદુઃખેન શત્રૂણાં ચ ભયાત્તતઃ ॥ ૧૧॥

એભિર્દ્વાદશભિઃ શ્લોકૈર્યઃ સ્તૌતિ ચ ધરાસુતમ્ ।
મહતીં શ્રિયમાપ્નોતિ હ્યપરો ધનદો યુવા ॥ ૧૨॥

ઇતિ શ્રીસ્કન્દપુરાણે ભાર્ગવપ્રોક્તં ઋણમોચકમઙ્ગલસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded by Aneesh Chinubhai

Proofread by Aneesh Chinubhai, Kirk Wortman kirkwort at hotmail.com

*RiNamochakamangalastotram*

pdf was typeset on June 23, 2022

Please send corrections to *sanskrit@cheerful.com*